# 4 निष्पत्तिः – फलितांशाः

## 4.1 वेदाङ्गानां प्रामुख्यम्

ऋचो यजूंषि चान्यानि सामानि विविधानि च ।

एष ज्ञेयस्त्रिवृद् वेदो यो वेदैनं स वेदवित् ॥ इति मनुस्मृतिः ॥

भारतीय वाङ्मये वेदानां प्रमुख-स्थानं वर्तते । विदन्त्यनेन धर्माधर्मौ इति वेदः । विद ज्ञाने इति धात्वर्थः । वेदानां भाषा भावश्च दुरूहौ । अतः वेदार्थानवबोधाय वेदाङ्गानाम् अपेक्षा भवति । पतञ्जलिना अपि उक्तम्—

ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च (महाभाष्ये पस्पशाह्निके 3.1.3) ।

अङ्ग्यते ज्ञायते अनेन इत्यङ्गम् । अर्थात् यस्मात् स्वरूपज्ञानं अवगम्यते तदङ्गमिति । किमस्ति स्वरूपज्ञानम् – तदा द्रष्टुः स्वरूपेऽवस्थानम् (इति योगसूत्रम् 1.1) । यदा चित्तवृत्तीनां निरोधः भवति तदा स्वरूपस्थानं भवति । तस्य वर्णनम् यथा— स्थूलसूक्ष्मकारणशरीराद्व्यतिरिक्तः पञ्चकोशातीतः सन् अवस्थात्रयसाक्षी सच्चिदानन्दस्वरूपः सन् यस्तिष्ठति स आत्मा (तत्त्वबोधः 2.2) । "अन्नमयः, प्राणमयः, मनोमयः, विज्ञानमयः, आनन्दमयः" इति तैत्तिरीयोपनिषदि अस्य पुरुषस्य पञ्चकोशाः व्याख्याताः । अत्र मनोमयकोशस्य वर्णनं यथा—

यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा ।

(तैत्तिरीयोपनिषत् – आनन्दवल्ली - तृतीयानुवाकः) ॥

एवं वेदवाङ्मयमेव पुरुषस्य मनोमयकोशं सूचयति । तस्य वेदाध्ययनस्य अधिकारप्राप्त्यै अध्येतव्यांशा एव वेदाङ्गानि । वेदाङ्गैः सह् वेदपुरुष ज्ञानमेव कैवल्यसाधकम् भवति । यथाचोक्तं श्वेताश्वेतरोपनिषदि—

वेदाहमेतं पुरुषं महान्तम् आदित्यवर्णं तमसः परस्तात् ।

तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ इति 3.8 ॥

**षडङ्गसहितः वेदपुरुषः ।**

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।

ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ।। 41 ।।

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।

तस्मात्साङ्गमधीत्येव ब्रह्मलोके महीयते ।। 42 ।। इति पाणिनीया शिक्षा ।

अत्र उच्चारण-गति-गानादि विधिना वेदवाङ्मयस्य शब्द रक्षणार्थं शिक्षा-छन्दश्शास्त्रयोः विनियोगः ।

- शब्दमय मन्त्राणां यथार्थोच्चारणाय प्रवर्तमानं वेदाङ्गं शिक्षा इत्यभिधीयते ।
- गायत्र्यादिषु बद्धानां वेदानां उच्चारणार्थं च गत्यादीनां ज्ञानार्थं च छन्दोज्ञानं नितरामपेक्षितम् ।

पुनः वेदवाङ्मयस्य अर्थावबोधने व्याकरण-निरुक्त-शास्त्रयोः विनियोगः ।

- रक्षा-ऊहा-आगम-लघु-असन्देहाः इति व्याकरण-शास्त्रानुसारेण शब्दानुशासनस्य प्रयोजनाः ।
- निरुक्तस्यास्ति विषयः वैदिकपदानां व्युत्पादनम् । निरुच्यते निश्शेषेणोपदिश्यते तत् तदर्थावबोधनाय पदजातं यत्र तन्निरुक्तमिति कथ्यते ।

ततःपुनः वेदवाङ्मयस्य अनुष्ठानादि पूर्वक ज्ञानार्जने ज्योतिष-कल्प-शास्त्रयोः विनियोगः ।

- वेदविहितकर्मानुष्ठाने उचितानुचित कालनिर्णयार्थं ज्योतिषम् उपयुज्यते ।
- वैदिक कर्मकाण्डस्य यज्ञयागस्य च यथार्थानुष्ठानाय प्रवृत्तमङ्गं कल्प इति कथ्यते ।

| वेदवाङ्मयस्य | | |
|---|---|---|
| शब्दरक्षणे | अर्थावबोधने | अनुष्ठानादिपूर्वक ज्ञानार्जने |
| शिक्षा<br>छन्दः | व्याकरणम्<br>निरुक्तम् | ज्यौतिषम्<br>कल्पः |

तथा वेदाङ्गानाम् अध्ययने सति शब्द-अर्थ-ज्ञानानां समापत्तिर्भवति । तदेव पतञ्जलिना सवितर्का समापत्तिः इति व्याख्यातम् । तत्र शब्द-अर्थ-ज्ञान-विकल्पैः सङ्कीर्णा सवितर्का समापत्तिः । इति योगसूत्रम् 1.42 ॥ पुनः, स्मृति-परिशुद्धौ स्वरूप-शून्य-इव अर्थमात्र-निर्भासा निर्वितर्का । इति योगसूत्रम् 1.43 ॥ अतः षडङ्ग-सहित-वेदाध्ययस्यान्ते अर्थमात्र-निर्भासत्वेन असम्प्रज्ञातो योगः भवति ।

## शिक्षा

शिक्षा = शिक्ष्यते ऽनयेति वर्णाद्युच्चारणलक्षणम् । शब्दानां उच्चारणे दोषाः सन्ति चेत्, तेषाम् अर्थ दोषः भविष्यति, तस्मात् साधकस्य नाशः अपि भविष्यति । यथा, इन्द्रशत्रुर्वर्धस्व इति शब्दस्य उच्चारणदोषात्, वृत्रासुरस्य नाशोऽभवत् ।

- अन्तोदात्त → इन्द्रस्य शत्रुः । इन्द्रशत्रुं ।
- आद्युदात्त → इन्द्रः शत्रुः यस्य सः । इन्द्रशंत्रु ।

पाणिनीय शिक्षायां शब्दोत्पत्तिवर्णनं क्रियते यथा—

आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया ।

मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥ पाणिनीय शिक्षा 6॥

आत्मा = अन्तःकरणम् , संस्काररूपेण, स्वगतान् अर्थान् , बुद्ध्या - स्ववृत्त्या , समेत्य - एकबुद्धिविषयान् कृत्वा , तद्बोधनेच्छया मनःयुक्तं करोति । (लघुशब्देन्दुशेखरः - संज्ञाप्रकरणम्) ।

शिक्षाशास्त्रे व्याहृत्युपासनं यथा—

| **प्रातःसवनम्** | **माध्यन्दिनम्** | **तार्तीय सवनम्** |
|---|---|---|
| उरसि चरन् | कण्ठे | शीर्ष्ण्यम् |
| मन्द्रं स्वरम् | मध्यमं स्वरम् | तारं स्वरम् |
| गायत्री | त्रिष्टुप् | जगती |
| शार्दूल रुतोपमा | चक्राह्व सङ्कूजितम् | मयूर-हंस स्वर तुल्यम् |

**छन्दः**

चदि आह्लादे दीप्तौ च । छन्दयति असुन् । छन्दयति = अह्लादयति, इति छन्दः । छन्द्यते अनेन वा इति छन्दः । छन्दयति = पृणाति रुचते इति छन्दः । छन्दयति मन्त्रप्रतिपादित यज्ञादीन् इति छन्दः । मनोमयकोशे सन् छन्दः प्राणमयकोशं छन्दयति इति वा प्राणमयकोशः छन्द्यते मनोमयात्मकेन छन्दसा वा इति ।

प्रज्ञानं ब्रह्मेति ऐतरेयोपनिषत् (3.3) ।

आनन्दो ब्रह्मेति तैत्तिरीयोपनिषत् (3.6) ।

तथा अह्लादकरश्च प्रदीपकश्च छन्दः आत्मसाक्षात्कार-योजकः वेदाङ्गेषु प्रधानः ।

भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः, इति तैत्तिरीयपनिषदि शीक्षावल्ली – पञ्चमानुवाकः । तथा छन्दोभिः व्याहृत्युपासनं यथा—

| गायत्री | त्रिष्टुभम् | जगती |
|---|---|---|
| पृथिवी गायत्री । | अन्तरिक्षं त्रिष्टुभम् । | द्यौर्जागती । |
| अग्निर्गायत्री । | इन्द्रस्त्रैष्टुभः । | विश्वेदेवा जागताः । |
| तेजो वै ब्रह्मवर्चसं गायत्रम् । | ओजो वा इन्द्रियं वीर्यं त्रिष्टुप् । | पशवो जागताः । |
| ब्रह्म गायत्रम् । | क्षत्रं त्रैष्टुभम् । | विड् जागतम् । |
| ब्राह्मणो गायत्रः । | क्षत्रियस्त्रैष्टुभः । | वैश्यो जागतः । |
| चतुर्विंशत्यक्षरा वाग्गायत्री । | चतुश्चत्वारिंशदक्षरा वाक् त्रिष्टुभी । | अष्टचत्वारिंशदक्षरा वाग् जागती । |

अर्थात्, गायत्र्या छन्दसा ब्राह्मणम्, त्रिष्टुभा राजन्यम्, जगत्या वैश्यम् असृजत् । तथैव गायत्र्या पृथिवीं च, त्रिष्टुभा अन्तरिक्षं च, जगत्या द्यौश्च असृजत् । पुनः गायत्र्या अग्निं च, त्रिष्टुभा वायुं च, जगत्या सूर्यं च असृजत् ।

माया मनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः।
छन्दोमयं यदजयार्पितषोडशारं संसारचक्रमज कोऽतितरेत्त्वदन्यः ॥ भागवतपुराणम् 7.9.21॥

अस्य दुस्तरस्य छन्दोमयस्य संसारचक्रस्य षोडशाराः प्रश्नोपनिषदि वर्णिताः यथा,

स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनः ।
अन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु च नाम च ॥ प्रश्नोपनिषद् 6.4 ॥
अरा इव रथनाभौ कला यस्मिन्प्रतिष्ठिताः ।
तं वेद्यं पुरुषं वेद यथ मा वो मृत्युः परिव्यथा इति ॥ प्रश्नोपनिषद् 6.6 ॥

तथा छन्दोमयस्य पुरुषस्य षोडशकलान् ज्ञात्वा, चित्तवृत्तीनां निरोधे सति असम्प्रज्ञातसमाधिः सिद्ध्यते ।

मार्गन्ति यत्ते मुखपद्मनीडैः छन्दः सुपर्णैः ऋषयो विविक्ते (3.5.40),

इत्यपि छन्दोभिः आत्मसाक्षात्कारमार्गं सुच्यते भागवत-पुराणे ।

**व्याकरणम्**

व्याकरणशास्त्रस्य वैशिष्ट्यं पतञ्जलिना व्याख्यातं यथा—

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश ॥ ऋग्वेदः 4.58.6 ॥

- चत्वारि शृङ्गाः → चत्वारि पदजातानि नाम-आख्यात-उपसर्ग-निपाताः च ।
- त्रयो अस्य पादाः → त्रयः कालाः भूत भविष्यत् वर्तमानाः ।

- द्वे शीर्षे → द्वौ शब्दात्मनौ नित्यः (व्यङ्ग्यः) कार्यः (व्यञ्जकः) च ।
- सप्त हस्तासो अस्य । → सप्त विभक्तयः ।
- त्रिधा बद्धो → त्रिषु स्थानेषु बद्धः उरसि, कण्ठे, शिरसि इति ।
- वृषभः → वृष सेचने । (वृषभो वर्षणात् । वर्षणञ्च ज्ञानपूर्वकानुष्ठानेन फलप्रदत्वम् ।)
- रोरवीति → शब्दं करोति इति ।
- महः देवः → महान् देवः = शब्दः । मर्त्यान् → मरणधर्माणः मनुष्याः, तान् । आविवेश ॥

इति पातञ्जल महाभाष्ये पस्पशाह्निकम् ।

संस्कृत व्याकरणशास्त्रे महेश्वरसूत्राणां प्राशस्त्यं लोकविदितमेव । 1. अइउण् । 2. ऋऌक् । 3. एओङ् । 4. ऐऔच् । 5. हयवरट् । 6. लण् । 7. ञमङ्णनम् । 8. झभञ् । 9. घढधष् । 10. जबगडदश् । 11. खफछठथचटतव् । 12. कपय् । 13. शषसर् । 14. हल् । इति चतुर्दश-महेश्वरसूत्राणि । अस्मिन् विषये नन्दिकेश-काशिकायां वर्ण्यते —

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥ (नन्दिकेश्वरकाशिका-1)

नृत्तावसाने = यदा चित्तवृत्तयः निरुद्धाः (असम्प्रज्ञाते समाधौ) सन्, नटराजराजः = ईश्वरः, सनकादिसिद्धान् = चतुर्विध (वितर्क-विचार-आनन्द-अस्मिता) तापासान्, उद्धर्तुकामः = चित्तविक्षेपाद्यन्तरायाभ्याम् उद्धर्तुं कामः यस्य सः, नवपञ्चवारम् = चतुर्दशवारम् (पञ्चवारं जगद्व्यक्तीकरणार्थं, नववारं जगतः स्तुत्यर्थं च), ढक्कां ननाद = अव्यक्तान् शब्दान् बोधयामास । एतद् शिवसूत्रजालम् = एतान् चतुर्दश सूत्रान्, विमर्शे = विचार्य स्फुटीकरोमि । तथा चतुर्दशवारं याः नादाः श्रुताः तयेव महेश्वरसूत्राणि वा शिवसूत्राणि इति नाम्ना प्रख्याताः । नृत्तावसानं सूचयति असम्प्रज्ञातासमाधिस्थं परमेश्वरम् । सम्प्रज्ञातस्थानां योगिनामुद्धर्तुं नवपञ्चवारं चकार ढक्कानादान् अव्यक्तान् च ।

तथा महेश्वरसूत्राणां योगदर्शनसारूप्यं, पुनस्तत्र पञ्चविंशतितत्त्वानां निरूपणं च नित्यमुक्तस्य केवलस्य ईश्वरस्य स्वरूपमपि च व्याख्यातम् । एतेषु चतुर्दशमहेश्वरसूत्रेषु पञ्चविंशतितत्त्वानि दृश्यन्ते । सर्गस्थितिसंहारतिरोभवानुग्रहानां पञ्चकृत्यानां वर्णनं त्रयश्चत्वारिंशद्भिरक्षरैः प्रदर्शितम् । यथा 43 त्रिकोणाः श्रीचक्रस्य बीजानि भवन्ति, तथैव ढक्काजनितानि एतानि 43 अक्षराणि वेदवाङ्मयस्य बीजानि भवन्ति ।

अस्मिन् जगति यत्सर्वं नामरूपैर्निर्देशितं तदहं शब्देन प्रख्यातं, यथा—

अकारः सर्ववर्णाग्र्यः प्रकाशः परमेश्वरः ।

आद्यमन्त्येन संयोगात् अहमित्येव जायते ॥ नन्दिकेश्वर-काशिका-4 ॥

तथा, यत्किमप्यस्ति तत्सर्वं मनोकल्पितं वाङ्मयमेव । "शब्दस्य परिणामोऽयम्" इति वाक्यपदीयम् (1.120) । ऋग्मन्त्रोऽपि यथा—

वागेव विश्वा भुवनानि जज्ञे वाच इत्सर्वममृतं यच्च मर्त्यम् ।

अथेद्वाग् बुभुजे वाग्वुवाच पुरुत्रा वाचो न पदं यच्च नाह ॥ (वाक्यपदीयम्-स्वोपज्ञ-वृत्तिः1.120)

यथोक्तं च भागवतपुराणे—

समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ।

हृद्याकाशादभून्नादो वृत्तिरोधाद् विभाव्यते ॥ भागवत-पुराणम्-12.6.37 ॥

तथाऽऽव्यक्तात् प्रणवात् नादः व्यक्तीभूतः । प्रणवस्य मात्रात्रयं सूचयति जाग्रत्स्वप्नसुषुप्त्यवास्थासु साक्षीभूतत्वं चापरामृष्टत्वं च । दृश्यरूपं सर्वं जगत् ततो प्रणवादेव व्यक्तः ।

**निरुक्तम्**

अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम् । निःशेषेन पदानामर्था उच्यन्ते यत्र तन्निरुक्तम् । अपिहितस्य अर्थस्य परोक्षवृत्तौ अपरोक्षवृत्तौ वा शब्दे निकृष्य विगृह्य वचनं निर्वचनम् । निरुक्तं वेदपुरुषस्य श्रोत्रमुच्यते, यथा निरुक्त-शास्त्राध्यायनात् वेदवाङ्मयस्य यथार्थज्ञानं सम्यक् वेद्यते ।

अलङ्कारशास्त्रे शब्दार्थयोः वृत्तित्रयं प्रख्यातमेव । वाचक-लक्षक-व्यञ्जकत्वेन त्रिविधं शब्दजातम् । वाच्य-लक्ष्य-व्यङ्ग्यत्वेन अर्थजातमपि त्रिविधम् । अभिधा-लक्षणा-व्यञ्जनाख्याः त्रिशब्दवृत्तयः । तत्र अभिधावृत्तिः वाच्यार्थम्, लक्षणावृत्तिः लक्ष्यार्थम्, व्यञ्जनावृत्तिः व्यङ्ग्यार्थं च भासयन्ति ।

| **शब्दम्** | **वृत्तिः (व्यापारम्)** | **अर्थम्** |
|---|---|---|
| वाचक शब्दम् | अभिधा | वाच्यार्थम् |
| लक्षक शब्दम् | लक्षणा | लक्ष्यार्थम् |
| व्यञ्जक शब्दम् | व्यञ्जना | व्यङ्ग्यार्थम् |

तथा निरुक्तशास्त्रे अपि, पदद्वयम् व्याख्यातम्—

1. समर्थ-स्वर-संस्काराः
   - अत्र, उदात्तादयः स्वराः । लोपागमवर्ण विकारादयः संस्काराश्च, व्याकरण शास्त्रेन सिद्धाः ।
   - तौ उभौ प्रादेशिकेन विकारेण चान्वितौ स्यातम् । ते योगशब्दाः वा योगारूढाः वा इति ख्याताः ।
2. असमर्थ-स्वर-संस्काराः
   - अनन्विते अर्थे, अप्रादेशिके विकारे, अर्थनित्यः परीक्षेत—
     - ✓ वृत्तिसामान्येन । अक्षरवर्ण सामान्यात् च ।

निरुक्तशास्त्रस्य प्रयोजन चतुष्कम्—

1. मन्त्रेषु अर्थप्रत्ययः
2. पदविभागः
3. देवता परिज्ञानम्
4. ज्ञानप्रशंसा अज्ञाननिन्दा च । (निरुक्तम् 1.15-1.17)

निघण्टुपाठस्य दैवतकाण्डे, अन्तरिक्षस्थानीयदेवतानां विषये रुद्रस्य वर्णनं कृतम् (यास्कस दशमाध्याये) ।

- रुद्रो रौतीति सतः । रोरूयमाणो द्रवतीति वा । रोदयतेर्वा ।
- यद् अरुदत् तद् रुद्रस्य रुद्रत्वम् । इति काठकम् ।
- यद् अरोदीत् तद् रुद्रस्य रुद्रत्वम् । इति हारिद्रविकम् । तस्यैषा भवति (10.5)

यथा पतञ्जलिनोक्तम्— तदेव अर्थ-मात्र-निर्भासं स्वरूप-शून्यम् इव समाधिः, योगसूत्रम् 3.3 । तथा, शब्दार्थज्ञानानि सम्यग् ज्ञात्वा, अर्थप्रत्यये चित्तं लीयते सति समाधिः भवति ।

**ज्यौतिषम्**

ज्योतींषि = ग्रहनक्षत्राणि । तान्यधिकृत्य प्रवृत्तमिदं शास्त्रं ज्योतिश्शास्त्रम् । प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ।

यथा शिखा मयूराणां नागानां मणयो यथा ।

तद्वद् वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम् ॥ (याजुषज्योतिषम् 4)

त्रिस्कन्धं जयोतिश्शास्त्रम् यथा—

सिद्धान्त संहिता होरा रुपं स्कन्ध त्रयात्मकम् ।

वेदस्य निर्मलं चक्षुः ज्योतिश्शास्त्रमनुत्तमम् ॥

अनेन ज्यौतिषशास्त्र-ज्ञानेन कालज्ञानम् अवगम्यते ।

सूर्य-चन्द्रम् असौ धत्तः कालं रात्रिन्दिवात्मकम् ।

भोक्त्री सुषुम्ना कालस्य गुह्यम् एतद् उदाहृतम् ॥ हठयोगप्रदीपिका 4.17॥

तत्र सिद्धान्तग्रन्थेषु कालस्य द्वैविध्यं निरूप्यते--

लोकानामन्तकृत् कालः कालोऽन्यः कलनात्मक: ।

स द्विधा स्थूलसूक्ष्मत्वात् मूर्त+अमूर्तश्च उच्यते ॥ सूर्यसिद्धान्तः 1.10 ॥

पुनस्तत्र नवविधकालमानानि यथा—

ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा ।

सौरं च सावनं चान्द्रं आर्क्षं मानानि वै नव ॥ सूर्यसिद्धान्तः 14.1

तिथि-वार-नक्षत्र-योग-करणैः पञ्चागैः कालस्य स्वरूपम् अवगम्यते । तदर्थं ग्रहनक्षत्राणां च भुवनानां च गतिविशेषादि ज्ञानम् आवश्यकं भवति । यथा पतञ्जलिनोक्तं, सूर्यचन्द्रध्रुवेषु संयमात् एतञ्ज्ञानं सिद्ध्यते ।

- भुवनज्ञानं सूर्ये संयमात् । योगसूत्रम् 3.26.
- चन्द्रे ताराव्यूह ज्ञानम् । योगसूत्रम् 3.27
- ध्रुवे तद्गति ज्ञानम् । योगसूत्रम् 3.28

पुनस्तत्र पराशरादि होराशास्त्रग्रन्थेषु सृष्टिक्रमवर्णनं च ग्रह-राशि-नक्षत्रादीनां स्वरूपं च वर्णितम् अस्ति । तत्र, सर्वेषु जीवेषु अंशद्वयं वर्तते । सूर्यादिग्रहाः ब्रह्म-रुद्रादयाश्च परमात्मकांशकाः अधिकाः । अन्ये जीवांशकाः अधिकाः । तत्रा रामः कृष्णः, नृसिंहः, वराहश्च एते चत्वारि अवताराः परमात्मांशकाः अधिकाः इति ज्ञेयम् । अन्ये तु जीवांशकान्विताः ।

रामः कृष्णश्च भो विप्र नृसिंहः सूकरस्तथा ।

एते पूर्णावताराश्च ह्यन्ये जीवांशकान्विताः ॥ बृहत्पराशरहोराशास्त्म् 2.2॥

दैत्यानां बलनाशाय, देवानां बलवृद्धये, ग्रहेभ्यः परमात्मा अवतरति । अवतारस्य कार्यस्य समाप्तौ पुनः तेषु ग्रहेषु एव विलीयन्ते ।

तत्र, स्वगत्या नक्षत्राणि गृह्णन्ति इति ग्रहाः । ग्रह उपादाने । अश्नुते आध्यात्मिक-ज्योतिषि इति राशिः । अशू व्याप्तौ । न क्षरन्ति इति नक्षत्राणि । क्षर सञ्चलने । अर्थात्, नक्षत्र-रूपेभ्यः सञ्चितकर्मेभ्यः वासनान् गृहीत्वा जात्यायुर्भोगादीन् विपाकान् जीवानां प्रदायन्ति ग्रहाः ।

- क्लेश-मूलः कर्माशयो दृष्टादृष्ट-जन्म-वेदनीयः । योगसूत्रम् 2.12 ।
- सति मूले तद्-विपाको जात्यायुर्भोगाः । योगसूत्रम् 2.13 ।
- ते ह्लाद-परिताप-फलाः पुण्यापुण्य-हेतुत्वात् । योगसूत्रम् 2.14 ।

तथापि सत्यमेतत्,

जीवानां कर्मफलदो ग्रहरूपी जनार्दनः ॥ बृहत्पराशरहोराशास्त्रम् 2.3॥

**कल्पः**

कल्प्यते समर्थ्यते यागप्रयोगोऽत्र इति कल्पः । अस्मिन् शास्त्रे, देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति पञ्चमहायज्ञाः, पुनः चत्वारिंशत् संस्काराश्च, अष्टौ आत्मगुणाश्च वर्णिताः । दया, सर्वभूतेषु-क्षान्तिः, अनसूया, शौचम्, अनायासः, मङ्गलम्, अकार्पण्यम् अस्पृहा इति अष्टौ आत्मगुणाश्च (गौतमधर्मसूत्रम् 8.23) । संस्क्रियते ज्ञानयोग्यताम्, आपद्यते चित्तम् अनेन इति संस्कारः । गौतमधर्मसूत्रेषु 19 ब्रह्मसंस्काराश्च, 21 दैवसंस्काराश्च, मिलित्वा 40 संस्काराः व्याख्याताः ।

- ब्राह्मसंस्कार-संस्कृतः ऋषीणां समानतां सलोकतां सायुज्यं गच्छति ।
- दैवेनोत्तरेण संस्कृतो देवानां समानतां सलोकतां सायुज्यं गच्छति । इति

एतेषां यज्ञादीनां अनुष्ठाने प्रयुक्ताः गणितशास्त्रस्य मौलिकांशाः अपि शुल्वसूत्रेषु वर्णिताः । पुनस्तत्र कल्पसूत्रेषु, ब्राह्मण-क्षत्रियादि वर्णचतुष्टयं, ब्रह्मचर्य-गृहस्थादि आश्रमचतुष्टयं, तेषां वर्णाश्रमधर्माश्च व्याख्याताः । तथा कल्पसूत्राणां विभागचतुष्कं दृश्यते—

1. श्रौतसूत्राणि
2. गृह्यसूत्राणि
3. धर्मसूत्राणि
4. शुल्वसूत्राणि

शतरुद्रीयस्य यागप्रोयोगेषु विनियोगविधानं कल्पशास्त्रेषु, विशेषतः कर्मविपाकादि धर्मशास्त्रेषु समग्ररूपेण व्याख्यातम् । यथा, रुद्रस्य, रुद्रैकादशिन्याः, महारुद्रस्य, अतिरुद्रस्य च विभागं वर्ण्यते—

विधिना नमकावृत्ति रुद्रस्यैकादशात्मिका ।
रुद्रस्यैकादशावृत्या रुद्रैकादशनी स्मृता ॥
एकादशभिर् एताभि र्महारुद्रश्च कथ्यते ॥
एकादश-महारुद्रैर् अतिरुद्र इतीष्यते ॥ (मदनमहार्णवम् इति कर्मविपाकः, षष्ठस्तरङ्गः)

तत्रैव विविधरोगाश्च, रोगनिदानञ्च, तेषां निवारणे शतरुद्रीयस्य विनियोगश्च सूचिताः ।

देवस्वहरणाच्चैव जायते विविधज्वरः ।
ज्वरो महाज्वरश्चैव रौद्रो वैष्णव एव तु ॥
ज्वरे रुद्रजपं कुर्यान्महारुद्रं महाज्वरे ।
महारुद्रं जपेद्रौद्रे वैष्णवे तद्द्वयं जपेत् ॥ (मदनमहार्णवम् इति कर्मविपाकः, दशमतरङ्गः)

यज्ञादीनां आवश्यकत्वं भगवद्गीतायां वासुदेवेनोक्तं यथा—

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ भगवद्गीता 18.5॥

तथैव मनुस्मृतिरपि—

स्वाध्यायेन व्रतैः होमैः त्रैविद्येन इज्यया सुतैः ।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥ मनुस्मृतिः2.28 ॥

तथा, स्वास्थ्यं कैवल्यं परमं धामं प्राप्त्यर्थं, कल्पसूत्रैः निर्देशितं निष्कामकर्मयोगम् एव उपायः ।

कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ ईशोपनिषत् 2 ॥

## 4.2 शतरुद्रीयेण ईश्वरप्रणिधानम्

कृष्णयजुर्वेदस्य तैत्तिरीयसंहितायां चतुर्थकाण्डे पञ्चमप्रपाठके श्रूयमाणाः एकदशानुवाकाः रुद्रप्रश्नः इति विख्यातम् । रुद्रप्रश्ने नमोनम इति शब्दानाम् आवृत्त्यतः नमकम् - इत्यपि अभिधीयते । शतम् = अनन्तानि रुद्रनामानि यस्मिन् तत् शतरुद्रीयम् । महाभारते अनुशासनिकपर्वणि उपमन्यूपख्याने शिवस्तव नाम चतुर्दशाध्याये शतरुद्रीयस्य प्राशस्त्यं वर्णितं यथा—

सामवेदश्च वेदानां यजुषां शतरुद्रियम् ।

सनत्कुमारो योगीनां साङ्ख्यानां कपिलो ह्यसि ॥ महाभारतम् 13.14.159 ॥

यजुर्वेदान्तर्गतासु शत-शाखासु पठ्यते, इत्यतः शतरुद्रीयम् अपि ख्यातम् । शतरुद्रीयस्य षड्विधः पाठभेदः षट्सु संहितासु अधुना लभ्यते । ते – तैत्तिरीय संहिता, काण्वसंहिता, माध्यन्दिनसंहिता, मैत्रायणीय संहिता, काठकसंहिता, कपिष्ठलकठसंहिता चेति । अत्र दक्षिणभारते विशेषतया तैत्तिरीय संहितायाः रुद्राध्यायः प्रसिद्धः, (गोविन्दाचार्यः 2013) । अत्र एकादशानुवाकाः सन्ति । तत्र आद्ये प्रथमानुवाके भगवतः प्रसादः । द्वितीयादिष्वष्टसु अनुवाकेषु सर्वेश्वरत्व-सर्वात्मकत्व-सर्वान्तर्यामित्वादि-रूपेण भगवन्नमस्कारः । ततो दशमे भगवतः प्रार्थना । एकादशे भगवदंशभूत रुद्रसङ्घ प्रार्थना । इति एकादशात्मक श्रीरुद्राध्यायार्थः । (अभिनवशङ्कर भाष्यम्) । संस्कृत वाङ्मये शतरुद्रीयस्य षडाचार्याणां व्याख्यानाः लभ्यन्ते ।

- सायणाचार्यः
- भट्टभास्करः
- अभिनव शङ्करः
- विष्णुसूरिः
- स्कन्ददेवः (शिवरहस्येतिहासे, द्वादशतम अंशः)
- बन्नञ्जे गोविन्दाचार्यः

**रुद्रस्य अहङ्कार तत्त्वाधिदैवतञ्च तथा ईश्वर तत्त्व निरूपणञ्च ।**

संस्कृत साहित्ये रुद्रः द्विधा कीर्त्यते, यथा अहङ्कारतत्त्वस्य अधिदेवो रुद्रश्च, पुनः निराकारो निर्गुणः परब्रह्मा परमेश्वरोऽपि रुद्रः इति । जगदुत्पत्ति वर्णनं तैत्तिरीयोपोनिषदि यथा, "सोऽकामयत । बहुस्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किञ्च । तत् सृष्ट्वा तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च । विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सत्यमभवत् । यदिदं किञ्च । तत्सत्यमित्याचक्षते (तैत्तिरीयोपनिषत् 2.6)" ॥ तथा ईश्वर एव स्वस्यां जगत्याम् अहङ्कार रूपेण मूर्तिमानभवत् ।

रुद्राविर्भाव कथनं श्रीमद्भागवतपुराणे तृतीय स्कन्धे द्वादशाध्याये वर्णितं यथा—

धिया निगृह्यमाणोऽपि भ्रुवोर्मध्यात्प्रजापतेः ।
सद्योऽजायत तन्मन्युः कुमारो नीललोहितः ॥ भागवतपुराणम् 3.12.7 ॥

अत्र प्रजापतिः हिरण्यगर्भ एव, स एव महत्तत्त्वाधिदैवः विरिञ्चिरिति कीर्तितः । यथा महाभारते—

हिरण्यगर्भो भगवानेष बुद्धिरिति स्मृतः ।
महानिति च योगेषु विरिञ्चिरिति चाप्यजः ॥ महाभारतम् 12.302.18 ॥

महत्तत्त्वात् अहङ्कारः, तस्मात् एकादशेन्द्रियाणि च दशेन्द्रियविषयाश्च यथा—

प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः ।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि ॥ साङ्ख्यकारिका 22 ॥

तत्र अहङ्कारतत्त्वाधिदैवः रुद्रः इति प्रख्यातमेव, महाभारतेऽपि वर्णितं यथा—

अहङ्कारिकम् अध्यात्मम् आहुस्तत्त्वनिदर्शिनः ।
अभिमानोऽधिभूतं तु रुद्रश्चात्राधिदैवतम् ॥ महाभारतम् 12.313.12 ॥

एतेषाम् एकादशरुद्राणां स्थानान्यपि सूचितानि भागवतपुराणे—

हृदिन्द्रियाण्यसुर्व्योम वायुरग्निर्जलं मही ।
सूर्यश्चन्द्रस्तपश्चैव स्थानान्यग्रे कृतानि मे ॥ भागवतपुराणम् 3.12.11 ॥

अत्र, पृथिव्याम् अन्नं च, अन्तरिक्षे वातश्च, दिवि वर्षं च, इत्यादयः तस्य शराः । नमो रुद्रेभ्यो ये पृथिव्यां ये अन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवः... इति (तैत्तिरीय संहिता 4.5.11.11) । तथा एतेषु स्थानेषु स्थिताः रुद्राः एतैः शरैः जीवानां कर्मफलानुसारेण पुण्यापुण्यफलं प्रयच्छन्ति । अतः रुद्रः शर्वः इति कीर्त्यते । स एव अस्य भवस्य कारणञ्च पतिश्च लयकारोऽपि च ।

नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च । (तैत्तिरीय संहिता 4.5.5)

नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाऽऽतताविने क्षेत्राणां पतये नमः । (तैत्तिरीय संहिता 4.2.6)

तथा, सर्गस्थितिलयादि कारणो भूत्वा रुद्रोब्रह्मेति निरूपितम् । यथा चोक्तं तैत्तिरीयपनिषदि—

यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत् प्रयन्ति अभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति ॥ 3 ॥ (तैत्तिरीयोपनिषत् 3.1)

स एव प्रपञ्चोपशमः शिवेति कीर्तितः । "अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनाऽऽत्मानं य एवं वेद" इति (माण्डूक्योपनिषद् 12) ॥ रुद्रानुवाकेष्वपि तस्य मोक्षप्रदत्वञ्च

परमानन्दकारणञ्च शिवतत्त्वमपिच श्लाघ्यते यथा, "नमस्ताराय नमश्शम्भवे च मयोभवे च नमश्शङ्कराय च मयस्कराय च नमश्शिवाय च शिवतराय च ।" (तैत्तिरीय संहिता 4.5.8) इति ।

**<u>योगदर्शने ईश्वरप्रणिधानोपायः ।</u>**

योगः समाधिः इति योगसूत्रस्य व्यासभाष्यम् (युज् समाधौ इति धात्वर्थे) । समाधि सिद्ध्यर्थं श्रद्धाद्युपायाः प्रोक्ताः महर्षिणा पतञ्जलिना यथा, "श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम्" इति योगसूत्रम् 1.20 । अर्थात्, "श्रद्धधानस्य विवेकार्थिनो वीर्यम् उपजायते । समुपजात वीर्यस्य स्मृतिः उपतिष्ठते । स्मृत्युपस्थाने च चित्तम् अनाकुलं समाधीयते । समाहितचित्तस्य प्रज्ञाविवेक उपावर्तते । येन यथावद्वस्तु जानन्ति । तदभ्यासात् तद्विषयाच्च वैराग्यात् असम्प्रज्ञातः समाधिर्भवति ॥ (1.20 योगसूत्रस्य व्यासभाष्यम्)" ।

एवं प्रोक्त्वा कश्चिदन्योपायमपि वर्ण्यते, "ईश्वरप्रणिधानाद्वा" इति योगसूत्रम् 1.23 ।

- प्रणिधानाद् = भक्तिविशेषाद् (मानसात् / वाचिकात् / कायिकात् वा) आवर्जितः (अभिमुखीकृतः)
- ईश्वरः तम् अनुगृह्णाति अभिध्यानमात्रेण । तदभिध्यानमात्रादपि योगिन आसन्नतमः समाधिलाभः समाधिफलं च भवतीति ॥23॥ (1.23 योगसूत्रस्य व्यासभाष्यम्)

एवं पतञ्जलिना समाधिलाभः प्रोच्यते ईश्वरप्रणिधानात् । "समाधिसिद्धिः ईश्वरप्रणिधानात्" इति योगसूत्रम् 2.45 । कथम् ईश्वरप्रणिधानं करणीयम्? "तज्जपस्तदर्थभावनम्" इति योगसूत्रम् 1.28 ।

- अर्थात् प्रणवस्य जपश्च, प्रणवाभिधेयस्य चेश्वरस्य भावनम् ।
- तदस्य योगिनः प्रणवं जपतः प्रणवार्थं च भावयतश्चित्तमेकाग्रं सम्पद्यते । (1.28 योगसूत्रस्य व्यासभाष्यम्)

यथा भगवद्गीतायामपि प्रोक्तम् ईश्वरप्रणिधानस्य लाभः —

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥ भगवद्गीता 12.6॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ॥ भगवद्गीता 12.7॥

तथा पतञ्जलिमहर्षिणा ईश्वरप्रणिधानात् फलद्वयं निरूप्यते यथा— "ततः प्रत्यक्चेतनाधिगमोऽपि अन्तरायाऽभावश्च" इति योगसूत्रम् 1.29 । प्रथमं तु – प्रत्यक्-चेतन-अधिगमः = स्वरूपदर्शनम् । यथैवेश्वरः पुरुषः शुद्धः प्रसन्नः केवलोऽनुपसर्गः तथायमपि बुद्धेः प्रतिसंवेदी पुरुष इत्येवम् अधिगच्छति ॥ (1.29 योगसूत्रस्य व्यासभाष्यम्) । द्वितीयं तु – अन्तराय-अभावः = व्याधिप्रभृतयः न भवन्ति । "व्याधि-स्त्यान-संशय-

प्रमाद-आलस्य-अविरति-भ्रान्तिदर्शन-अलब्धभूमिकत्व-अनवस्थितत्वानि चित्तविक्षेपाः ते अन्तरायाः" इति योगसूत्रम् 1.30 ।

शतरुद्रीयं परमं मन्त्रौषधमिति परिचयाध्याये 2.3.2.3 मध्ये निरूपितम् ।

**ईश्वरप्रणिधाने शतरुद्रीयस्य विनियोगः ।**

तैत्तिरीयसंहितायां रुद्राध्याये, भिषक् रूपेण च अघोर रूपेण च श्लाघ्यते रुद्रः । भिषग्रूपेण व्याध्यादीन् दूरीकर्तुं च, अघोररूपेण स्वरूप-प्रकाशनार्थं चेति । अत्र भिषगिति शब्दस्य उपलक्षणनेन व्याध्यादि सर्वविक्षेपहरणं ग्रहीतव्यम् । अत्र प्रथमानुवाके,

अध्यवोचदधि वक्ता प्रथमो दैव्यो भिषक् ।
अहीगँ् श्च सर्वाञ्जम्भयन् सर्वाश्च यातुधान्यः ॥ तैत्तिरीयसंहिता 4.5.1.6॥

अत्र, "प्रथमो दैव्यो" इत्यादि शब्दैः, तस्य ईश्वर तत्त्वम् निरूप्यते, यथोक्तं पतञ्जलिना "पूर्वेषामपि गुरुः कालेन-अनवच्छेदात्" इति योगसूत्रम् 1.26 । पुनस्तस्य कालेनानवच्छेद्यं निरूप्यते च षष्ठानुवाके, "नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च" (तैत्तिरीयसंहिता 4.5.6) इति ।

रुद्रस्य भैषजलक्षणम् ऋग्वेदसूक्तेष्वपि बह्वत्र श्रूयते । द्वितीयमण्डले त्रयस्त्रिंशतितमे रुद्रसूक्ते रुद्रो भिषक्तम इति विशेषतः श्लाघ्यते । यथा,

- गाथपतिं मेधपतिं रुद्रं जलाषभेषजम् । तच्छंयोः सुम्नमीमहे ॥ ऋग्वेद संहिता 1.43.4॥
- दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे । हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म च्छर्दिरस्मभ्यं यंसत् ॥ ऋग्वेद संहिता 1.114.5॥
- मा त्वा रुद्र चुक्रुधामा नमोभिर्मा दुष्टुती वृषभ मा सहूती । उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि ॥ ऋग्वेद संहिता 2.33.4॥

**शतरुद्रीयं कैवल्योपायम् ।**

रुद्रः शिवः शिवतरः शिवतमः इति बहुना श्लघ्यते रुद्रानुवाकेषु । यथा,

यात इषुः शिवतमा शिवं बभूव ते धनुः ।
शिवा शरव्या या तव तया नो रुद्र मृडय ॥ तैत्तिरीयसंहिता 4.5.1.2॥

यथा कैवल्योपनिषदि (2.24) शतरुद्रीयस्य अध्ययन फलम् कैवल्यपद प्राप्तिरिति प्रोक्तम् —

यः शतरुद्रियमधीते सोऽग्निपूतो भवति सुरापानात्पूतो भवति स ब्रह्महत्यायाः पूतो भवति स सुवर्णस्तेयात्पूतो भवति स कृत्याकृत्यात्पूतो भवति तस्मादविमुक्तमाश्रितो भवत्यत्याश्रमी सर्वदा सकृद्वा जपेत् ॥ अनेन ज्ञानमाप्नोति संसारार्णवनाशनम् । तस्मादेवं विदित्वैनं कैवल्यं पदमश्नुते कैवल्यं पदमश्नुत इति ॥

अथ जाबाल्युपनिषदि (चतुर्थे मन्त्रे) अमृतत्त्व सिद्धिरिति याज्ञवल्क्येनोक्तम्—

अथ हैनं ब्रह्मचारिण ऊचुः किं जप्येनामृतत्वं ब्रूहीति ॥ स होवाच याज्ञवल्क्यः । शतरुद्रियेणेत्येतान्येव ह वा अमृतस्य नामानि ॥ एतैर्ह वा अमृतो भवतीति एवमेवैतद्याज्ञवल्क्यः ॥

महाभारतेऽपि द्रोणपर्वणि प्रतिज्ञापर्वणि पाशुपतास्त्र सिद्ध्यर्थं कृष्णार्जुनाभ्यां शतरुद्रियस्य विनियोगः—

ततः कृष्णश्च पार्थश्च संस्पृश्यापः कृताञ्जली । तौ नागावुपतस्थाते नमस्यन्तौ वृषध्वजम् ॥7.57.70॥

गृणन्तौ वेदविदुषौ तद्ब्रह्म शतरुद्रियम् । अप्रमेयं प्रणमन्तौ गत्वा सर्वात्मना भवम् ॥7.57.71॥

आपस्तम्बीय श्रौतसूत्रेष्वपि स्वरूपावबोधने शतरुद्रियस्य विनियोगः यथा,

यो रुद्रो अग्नाविति रौद्रं गावीधुकं चरुम् । 17.12.1 ॥

एतेन यजुषा यस्यामिष्टकायां शतरुद्रीयं जुहोति तस्यां प्रतिष्ठापयति । 17.12.2 ॥

तथा, कैवल्यसिद्ध्यर्थं वा स्वरूपदर्शनार्थं वा प्रत्यक्चेतनाधिगमे शतरुद्रियस्य वैशिष्ट्यं दृश्यते ।

**<u>शतरुद्रीयस्य ईश्वरप्रणिधानोपायषु प्राशस्त्यम् ।</u>**

एवं प्रकारेण, ततः प्रत्यक्चेतनाधिगमोऽपि अन्तरायाभावश्च (योगसुत्रम् 1.29), इति फलद्वयं शतरुद्रीय विनियोगेन दर्शितम् । लिङ्गपुराणे उत्तरभागे द्वादशाध्याये रुद्रस्य ध्यानविधिः प्रोच्यते यथा,

नारुद्रस्तु स्पृसेद्रुद्रं नारुद्रो रुद्रमर्चयेत् ।

नारुद्रः कीर्तयेद्रुद्रं नारुद्रो रुद्रमाप्नुयात् ॥ 12.82 ।।

यथा पतञ्जलिनोक्तम्, “क्षीणवृत्तेः, अभिजातस्येव मणेः, ग्रहीतृ-ग्रहण-ग्राह्येषु तत्स्थ तदञ्जनता-समापत्तिः ।” इति (योगसूत्रम् 1.41) । तथा ध्यातृ-ध्येययोः समापत्तिर्भवति सति चित्तविक्षेपादि नाशनं च योगसिद्धिश्च भवति । पुनस्तत्र, तीव्र-संवेगानाम् आसन्नः (योगसूत्रम् 1.21) । मृदु-मध्य-अधिमात्रत्वात् ततोऽपि विशेषः ॥ (योगसूत्रम् 1.22) इति सूत्रद्वयेन, साधकस्य चित्तभूमिकानां भेदानुसारेण फलभेदं प्राप्यते इति ज्ञातुं शक्यते । भगवता वासुदेवेनापि चोक्तं तथा—

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ।

आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ भगवद्गीता 7.16॥

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।

तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ भगवद्गीता 7.21॥

अत एव यजुर्वेद संहितायां सत्यपि रुद्राध्यायः उपनिषदिति कीर्त्यते । अत्र रुद्रोपसनमेव प्रणवोपासनम् इति ज्ञायते । यथोच्यते, "प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते" इति (मुण्डकोपनिषत् 2.2.4), अत्र शतरुद्रीयमेव प्रणवः । शरो हि स्वयमात्मा । रुद्र एव ब्रह्मा । तस्मात्—

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥ इति प्रार्थना ॥